# संस्कृतम्

## (309)

## शिक्षक अंकितमूल्यांकनपत्रम्

पूर्णांकाः 20

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। प्रश्नानुसारेण अंकाः प्रश्नसमक्षे दर्शिताः।

(ii) उत्तरपुस्तिकायाः प्रथमपृष्ठे स्वनाम, अनुक्रमांक संख्या, शिक्षण-केन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2×1=2

(क) 'जीवन-संदेशः' इति पाठे प्रयुक्तानां कानिचित् पञ्च सूक्तीनां भावार्थं लिखत। (पाठ-1, जीवन-संदेशः)

(ख) ''नित्यं रथेन गच्छामि, अश्वा वहन्ति मे रथम्।
सम्राडस्मि नरो नास्मि, नासुरोऽस्मि निशाचरः।।''
अस्याः प्रहेलिकाया उत्तरं लिखित्वा भावार्थमपि लिखत। (पाठ-2, यदि जानासि तद् वद)

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2×1=2

(क) अतिलोभस्य कः परिणामः? अतिलोभः न कर्तव्यः'' इति पाठम् आधृत्य व्याख्यायताम्।

(पाठ-5, अतिलोभः न कर्तव्य)

(ख) ''राजते खलु कन्याकुमारी'' इति पाठमाधृत्य दक्षिणभारतस्य प्रदेशानां त्रयाणां सागराणां नामानि च लिखत।

(पाठ-6, राजते खलु कन्याकुमारी)

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2×1=2

(क) ''जीवन-संदेशः'' इति पाठमाधृत्य कानिचित् पञ्च जीवनमूल्यानां स्वजीवने महत्त्वं लिखत।

(पाठ-1, जीवन-संदेशः)

(ख) ''राजते खलु कन्याकुमारी'' इति पाठमाधृत्य कन्याकुमारी इति संदर्भे प्रचलिता कानिचित् एका कथा स्वशब्दैः पञ्चवाक्येषु लिखत।

(पाठ-6, राजते खलु कन्याकुमारी)

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत। 4×1=4

(क) कस्यचिदेकस्य सर्वनाम शब्दस्य रूपाणि लिखित्वा पञ्चवाक्येषु प्रयोगमपि प्रदर्शयत।

(पाठ-2, यदि जानासि तद् वद)

(ख) क्त्वा, ल्यप्, तुमुन् प्रत्ययानां प्रयोगं स्ववाक्येषु लिखत।

(पाठ-5, अतिलोभः न कर्तव्यः)

5. कस्यचिदेकस्य उत्तरं 100–150 शब्देषु लिखत। 4×1=4

(क) ''काले फलति सौभाग्यम्'' इति पाठस्य सारांशं स्वशब्देषु लिखत।

(पाठ–9, काले फलति सौभाग्यम्)

(ख) ''काले फलति सौभाग्यम्'' इति पाठस्य कस्यचिदेकस्य पात्रस्य चरित्रचित्रणं लिखित्वा कस्यचित् एकस्य विशिष्ट लक्षणस्य स्वजीवने महत्त्वं प्रदर्शयत। (पाठ–9, काले फलति सौभाग्यम्)

6. अधोलिखितेषु कमपि एकं विषयमधिकृत्य परियोजना–विवरणं लिखत। 6×1=6

(क) नगरेषु प्रदूषणसमस्यां अधिकृत्य एका परियोजना निमीयताम्।

(ख) केन्द्रसरकारस्य प्रमुखविभागानां/संस्थानां दश आदर्शवाक्यानि (यथा–योगक्षेमं वहाम्यहम्, अहर्निशं सेवामहे इत्यादिकान्) आधृत्य एका परियोजना सज्जीक्रियताम्। आदर्शवाक्यानां भावार्थमपि लिखत।